## ॥ पुरुषसूक्त ॥

हरिःॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् स्वाहा ॥१॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति स्वाहा ॥२॥

एतावानस्य महिमाऽतो ज्यायाँश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि स्वाहा ॥३॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विश्वङ् व्यक्रामत्साशनानशने अभि स्वाहा ॥४॥

तस्माद्विराळजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः स्वाहा ॥५॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः स्वाहा ॥६॥

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये स्वाहा ॥७॥

तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्।
पशून् ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये स्वाहा ॥८॥

तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत स्वाहा ॥९॥

तस्मादश्वा अजायंत ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः स्वाहा ॥१० ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।

मुखं किमस्य कौ बाहू का उरू पादा उच्येते स्वाहा ॥११ ॥

ब्राह्मणोस्य मुखमासीद् बाहू राजन्यः कृतः ।

ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत स्वाहा ॥१२ ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।

मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत स्वाहा ॥१३ ॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।

पभ्द्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् स्वाहा ॥१४ ॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।

देवा यद् यज्ञं तन्वानाः अबध्नन् पूरुषं पशुम् स्वाहा ॥१५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः स्वाहा ॥१६ ॥

# ॥विष्णुसूक्त ॥

अतो देव अवंतु नो यतो विष्णुर्विचक्रमे ।

पृथिव्याः सप्त धामभिः स्वाहा ॥१ ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।

समूळ्हमस्य पांसुरे स्वाहा ॥२ ॥

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।

अतोः धर्माणि धारयन् स्वाहा ॥३ ॥

विष्णोः कर्माणि पश्यत् यतो व्रतानि पस्पशे ।

इंद्रस्य युज्यः सखा स्वाहा ॥४ ॥

तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ।

दिवीव चक्षुराततम् स्वाहा ॥५ ॥

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।

विष्णोर्यत् परमं पदम् स्वाहा ॥६ ॥

---

वरील सूक्त हवनासाठी आहे अभिषेक करताना स्वाहा गाळून म्हणावे

---